श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્દ્ભાગવત રસિક કુટુંબ

## UG-11.16 - તૃતીય સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.
દેવીં(મ્) સરસ્વતીં(મ્) વ્યાસં(ન્), તતો જયમુદીરયેત્.

નામસઙ્કીર્તનં(મ્) યસ્ય, સર્વપાપપ્રણાશનમ્.
પ્રણામો દુ:ખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.

શ્રીમદ્ભાગવતમહાપુરાણમ્
એકાદશઃ સ્કન્ધઃ
.. અથ ષોડશોઽધ્યાયઃ ..

### ઉદ્ધવ ઉવાચ

ત્વં(મ્) બ્રહ્મ પરમં(મ્) સાક્ષા - દનાદ્યન્તમપાવૃતમ્ .
સર્વેષામપિ ભાવાનાં(ન્), ત્રાણસ્થિત્યપ્યયોદ્ભવઃ .. ૧..

દના + દ્યન્ત + મપાવૃતમ્ ,ત્રાણસ્ + થિત્યપ્ + યયોદ્ + ભવઃ

ઉચ્ચાવચેષુ ભૂતેષુ, દુર્જ્ઞેયમકૃતાત્મભિઃ .
ઉપાસતે ત્વાં(મ્) ભગવન્, યાથાતથ્યેન બ્રાહ્મણાઃ .. ૨..

દુર્જ્ઞેય + મકૃતાત્ + મભિઃ

યેષુ યેષુ ચ ભાવેષુ, ભક્ત્યા ત્વાં(મ્) પરમર્ષયઃ .
ઉપાસીનાઃ(ફ્) પ્રપદ્યન્તે, સં(વ્)સિદ્ધિં(ન્) તદ્ વદસ્વ મે .. ૩..

પરમર્ + ષયઃ

ગૂઢશ્ચરસિ ભૂતાત્મા, ભૂતાનાં(મ્) ભૂતભાવન .
ન ત્વાં(મ્) પશ્યન્તિ ભૂતાનિ, પશ્યન્તં(મ્) મોહિતાનિ તે .. ૪..

ગૂઢશ્ + ચરસિ

યાઃ(ખ્) કાશ્ચ ભૂમૌ દિવિ વૈ રસાયાં(મ્),
વિભૂતયો દિક્ષુ મહાવિભૂતે .
તા મહ્યમાખ્યાહ્યનુભાવિતાસ્તે,
નમામિ તે તીર્થપદાઙ્ઘ્રિપદ્મમ્ .. ૫..

મહ્ય + માખ્યા + હ્યનુભા + વિતાસ્તે ,
તીર્થ + પદાઙ્ઘ્રિ + પદ્મમ્

શ્રીભગવાનુવાચ

એવમેતદહં(મ્) પૃષ્ટઃ(ફ્), પ્રશ્નં(મ્) પ્રશ્નવિદાં(મ્) વર .
યુયુત્સુના વિનશને, સપત્નૈરર્જુનેન વૈ .. ૬..

સપત્નૈ + રર્ + જુનેન

જ્ઞાત્વા જ્ઞાતિવધં(ઙ્) ગર્હ્ય - મધર્મં(મ્) રાજ્યહેતુકમ્ .
તતો નિવૃત્તો હન્તાહં(મ્) હતોઽયમિતિ લૌકિકઃ .. ૭..

રાજ્ય + હેતુકમ્

સ તદા પુરુષવ્યાઘ્રો, યુક્ત્યા મે પ્રતિબોધિતઃ .
અભ્યભાષત મામેવં(મ્), યથા ત્વં(મ્) રણમૂર્ધનિ .. ૮..

પુરુષવ્ + યાઘ્રો

અહમાત્મોદ્ધવામીષાં(મ્) ભૂતાનાં(મ્) સુહૃદીશ્વરઃ .
અહં(મ્) સર્વાણિ ભૂતાનિ, તેષાં(મ્) સ્થિત્યુદ્ભવાપ્યયઃ .. ૯..

અહમાત્ + મોદ્ + ધવામીષાં ,
સ્થિત્યુદ્ + ભવાપ્યયઃ

અહં(ઙ્) ગતિર્ગતિમતાં(ઙ્) કાલઃ(ખ્) કલયતામહમ્ .
ગુણાનાં(ઞ્) ચાપ્યહં(મ્) સામ્યં(ઙ્), ગુણિન્યૌત્પત્તિકો ગુણઃ .. ૧૦..

ગુણિન્યૌત્ + પત્તિકો

ગુણિનામપ્યહં(મ્) સૂત્રં(મ્), મહતાં(ઙ્) ચ મહાનહમ્ .
સૂક્ષ્માણામપ્યહં(ઞ્) જીવો, દુર્જયાનામહં(મ્) મનઃ .. ૧૧..

સૂક્ષ્માણા + મપ્યહં

હિરણ્યગર્ભો વેદાનાં(મ્), મન્ત્રાણાં(મ્) પ્રણવસ્ત્રિવૃત્ .
અક્ષરાણામકારોઽસ્મિ, પદાનિચ્છન્દસામહમ્ .. ૧૨..

પ્રણવસ્ + ત્રિવૃત્ ,

પદાનિય્ + છન્દ + સામહમ્

ઇન્દ્રોઽહં(મ્) સર્વદેવાનાં(મ્), વસૂનામસ્મિ હવ્યવાટ્ .
આદિત્યાનામહં(મ્) વિષ્ણૂ, રુદ્રાણાં(ન્) નીલલોહિતઃ .. ૧૩..

વસૂના + મસ્મિ

બ્રહ્મર્ષીણાં(મ્) ભૃગુરહં(મ્), રાજર્ષીણામહં(મ્) મનુઃ .
દેવર્ષીણાં(ન્) નારદોઽહં(મ્), હવિર્ધાન્યસ્મિ ધેનુષુ .. ૧૪..

રાજર્ષી + ણામહં(મ્) ,હવિર્ + ધાન્યસ્મિ

સિદ્ધેશ્વરાણાં(ઙ્) કપિલઃ(સ્), સુપર્ણોઽહં(મ્) પતત્ત્રિણામ્ .
પ્રજાપતીનાં(ન્) દક્ષોઽહં(મ્), પિતૃણામહમર્યમા .. ૧૫..

સિદ્ધેશ્ + વરાણાં(ઙ્), પતત્ + ત્રિણામ્ ,

પિતૃણા + મહમર્ + યમા

માં (મ્) વિદ્ધ્યુદ્ધવ દૈત્યાનાં(મ્), પ્રહ્લાદમસુરેશ્વરમ્ .
સોમં(ન્) નક્ષત્રૌષધીનાં(ન્), ધનેશં(મ્) યક્ષરક્ષસામ્ .. ૧૬..

વિદ્ + ધ્યુદ્ + ધવ ,

પ્રહ્લા + દમ + સુરેશ્વરમ્

ઐરાવતં(ઙ્) ગજેન્દ્રાણાં(મ્), યાદસાં(મ્) વરુણં(મ્) પ્રભુમ્ .
તપતાં(ન્) ધુમતાં(મ્) સૂર્યં(મ્), મનુષ્યાણાં(ઞ્) ચ ભૂપતિમ્ .. ૧૭..

ઉચ્ચૈઃ(શ્)શ્રવાસ્તુરં(ઙ્)ગાણાં(ન્)ધાતૂનામસ્મિ કાં(ઞ્)ચનમ્ .
યમઃ(સ્) સં(ય્)યમતાં(ઞ્) ચાહં(મ્), સર્પાણામસ્મિ વાસુકિઃ .. ૧૮..

ઉચ્ચૈઃ(શ્) + શ્રવાસ્ + તુરં(ઙ્) + ગાણાં(ન્)

નાગેન્દ્રાણામનન્તોડહં(મ્), મૃગેન્દ્રઃ(શ્) શૃં(ઙ્)ગિદં(વ્)ષ્ટ્રિણામ્ .
આશ્રમાણામહં(ન્) તુર્યો, વર્ણાનાં(મ્) પ્રથમોડનઘ .. ૧૯..

નાગેન્દ્રાણા + મનન્તોડહં(મ્) ,
શૃં(ઙ્)ગિ + દં(વ્)ષ્ટ્રિણામ્

તીર્થાનાં(મ્) સ્રોતસાં(ઙ્) ગઙ્ગા, સમુદ્રઃ(સ્) સરસામહમ્ .
આયુધાનાં(ન્) ધનુરહં(ન્), ત્રિપુરઘ્નો ધનુષ્મતામ્ .. ૨૦..

ત્રિપુ + રઘ્નો

ધિષ્ણ્યાનામસ્મ્યહં(મ) મેરુર્ - ગહનાનાં(મ્) હિમાલયઃ .
વનસ્પતીનામશ્વત્થ, ઓષધીનામહં(મ્) યવઃ .. ૨૧..

ધિષ્ણ્યા + નામસ્ + મ્યહં(મ્) ,
વનસ્પતીના + મશ્વત્થ

પુરોધસાં(મ્) વસિષ્ઠોડહં(મ્), બ્રહ્મિષ્ઠાનાં(મ્) બૃહસ્પતિઃ .
સ્કન્દોડહં(મ્) સર્વસેનાન્યા - મગ્રણ્યાં(મ્) ભગવાનજઃ .. ૨૨..

બ્રહ્મિષ્ + ઠાનાં(મ્)

યજ્ઞાનાં(મ્) બ્રહ્મયજ્ઞોડહં(મ્), વ્રતાનામવિહિં(વ્)સનમ્ .
વાય્વગ્ન્યર્કામ્બુવાગાત્મા, શુચીનામપ્યહં(મ્) શુચિઃ .. ૨૩..

વ્રતાના + મવિહિં(વ્) + સનમ્ ,
વાય્ + વગ્ન્યર્ + કામ્બુવા + ગાત્મા ,શુચીના + મપ્યહં(મ્)

યોગાનામાત્મસં(વ્)રોધો, મન્ત્રોડસ્મિ વિજિગીષતામ્ .
આન્વીક્ષિકી કૌશલાનાં(મ્), વિકલ્પઃ(ખ્) ખ્યાતિવાદિનામ્ .. ૨૪..

યોગાના + માત્મ + સં(વ્)રોધો, વિજિગી + ષતામ્

સ્ત્રીણાં(ન્) તુ શતરૂપાહં(મ્), પું(વ્)સાં(મ્) સ્વાયમ્ભુવો મનુઃ .
નારાયણો મુનીનાં(ઞ્) ચ, કુમારો બ્રહ્મચારિણામ્ .. ૨૫..

શત + રૂપાહં(મ્)

ધર્માણામસ્મિ સં(ન્)ન્યાસઃ(હ્), ક્ષેમાણામબહિર્મતિઃ .
ગુહ્યાનાં(મ્) સૂનૃતં(મ્) મૌનં(મ્), મિથુનાનામજસ્ત્વહમ્ .. ૨૬..

ક્ષેમાણા + મબહિર્ + મતિઃ , મિથુનાના + મજસ્ + ત્વહમ્

સં(વ્)વત્સરોઽસ્મ્યનિમિષા -  મૃતૂનાં(મ્) મધુમાધવૌ .

માસાનાં(મ્) માર્ગશીર્ષોઽહં(ન્), નક્ષત્રાણાં(ન્) તથાભિજિત્ .. ૨૭..

સંવત્સરોઽસ્ + મ્યનિમિષા

અહં(મ્) યુગાનાં(ઞ્) ચ કૃતં(ન્), ધીરાણાં(ન્) દેવલોઽસિતઃ .

દ્વૈપાયનોઽસ્મિ વ્યાસાનાં(ઙ્), કવીનાં(ઙ્) કાવ્ય આત્મવાન્ .. ૨૮..

દ્વૈપા + યનોઽસ્મિ

વાસુદેવો ભગવતાં(ન્), ત્વં(ન્) તુ ભાગવતેષ્વહમ્ .

કિં(મ્)પુરુષાણાં(મ્) હનુમાન્, વિદ્યાધ્રાણાં(મ્) સુદર્શનઃ .. ૨૯..

ભાગવતેષ્ + વહમ્

રત્નાનાં(મ્) પદ્મરાગોઽસ્મિ, પદ્મકોશઃ(સ્) સુપેશસામ્ .

કુશોઽસ્મિ દર્ભજાતીનાં(ઙ્), ગવ્યમાજ્યં(મ્) હવિઃ(ષ્)ષ્વહમ્ .. ૩૦..

પદ્મ + રાગોઽસ્મિ

વ્યવસાયિનામહં(મ્) લક્ષ્મીઃ(ખ્), કિતવાનાં(ઞ્) છલગ્રહઃ .

તિતિક્ષાસ્મિ તિતિક્ષૂણાં(મ્), સત્ત્વં(મ્) સત્ત્વવતામહમ્ .. ૩૧..

વ્યવસા + યિનામહં(મ્), સત્ત્વ + વતામહમ્

ઓજઃ(સ્) સહો બલવતાં(ઙ્)  કર્માહં(મ્) વિદ્ધિ સાત્વતામ્ .

સાત્વતાં(ન્) નવમૂર્તીના - માદિમૂર્તિરહં(મ્) પરા .. ૩૨..

માદિ + મૂર્તિ + રહં(મ્)

વિશ્વાવસુઃ(ફ્) પૂર્વચિત્તિર્ -  ગન્ધર્વાપ્સરસામહમ્ .

ભૂધરાણામહં(મ્) સ્થૈર્યં(ઙ્), ગન્ધમાત્રમહં(મ્) ભુવઃ .. ૩૩..

ગન્ધર્ + વાપ્ + સરસામહમ્ , ગન્ધમાત્ર + મહં(મ્)

અપાં(મ્) રસશ્ચ પરમસ્ - તેજિષ્ઠાનાં(મ્) વિભાવસુઃ .

પ્રભા સૂર્યેન્દુતારાણાં(મ્) શબ્દોઽહં(ન્) નભસઃ(ફ્) પરઃ .. ૩૪..

સૂર્યેન્દુ + તારાણાં(મ્)

બ્રહ્મણ્યાનાં(મ્) બલિરહં(મ્), વીરાણામહમર્જુનઃ .

ભૂતાનાં(મ્) સ્થિતિરુત્પત્તિ - રહં(મ્) વૈ પ્રતિસઙ્ક્રમઃ .. ૩૫..

વીરાણા + મહમર્જુનઃ, સ્થિતિ + રુત્પત્તિ

ગત્યુક્ત્યુત્સર્ગોપાદાન - માનન્દસ્પર્શલક્ષણમ્ .
આસ્વાદશ્રુત્યવઘ્રાણ - મહં(મ્) સર્વેન્દ્રિયેન્દ્રિયમ્ .. ૩૬..

ગત્ + યુક્ + ત્યુત્ + સર્ગોપાદાન ,
માનન્દ + સ્પર્શ + લક્ષણમ્

પૃથિવી વાયુરાકાશ, આપો જ્યોતિરહં(મ્) મહાન્ .
વિકારઃ(ફ્) પુરુષોઽવ્યક્તં(મ્), રજઃ(સ્) સત્ત્વં(ન્) તમઃ(ફ્) પરમ્ .. ૩૭..

જ્યોતિ + રહં(મ્)

અહમેતત્પ્રસં(ઙ્)ખ્યાનં(ઞ્), જ્ઞાનં(ન્) તત્ત્વવિનિશ્ચયઃ .
મયેશ્વરેણ જીવેન, ગુણેન ગુણિના વિના .
સર્વાત્મનાપિ સર્વેણ, ન ભાવો વિદ્યતે ક્વચિત્ .. ૩૮..

અહ + મેતત્ + પ્રસં(ઙ્)ખ્યાનં(ઞ્) ,
સર્વાત્ + મનાપિ

સં(ઙ્)ખ્યાનં(મ્) પરમાણૂનાં(ઙ્), કાલેન ક્રિયતે મયા .
ન તથા મે વિભૂતીનાં(મ્) સૃજતોઽણ્ડાનિ કોટિશઃ .. ૩૯..

સૃજતોઽણ્ + ડાનિ

તેજઃ(શ્) શ્રીઃ(ખ્) કીર્તિરૈશ્વર્યં(મ્), હ્રીસ્ત્યાગઃ(સ્) સૌભગં(મ્) ભગઃ .
વીર્યં(ન્) તિતિક્ષા વિજ્ઞાનં(મ્), યત્ર યત્ર સ મેંઽ(વ્)શકઃ .. ૪૦..

કીર્તિ + રૈશ્વર્યં(મ્), હ્રીસ્ + ત્યાગઃ(સ્)

એતાસ્તે કીર્તિતાઃ(સ્) સર્વાઃ(સ્) સં(ઙ્)ક્ષેપેણ વિભૂતયઃ .
મનોવિકારા એવૈતે, યથા વાચાભિધીયતે .. ૪૧..

વાચા + ભિધીયતે

વાચં(મ્) યચ્છ મનો યચ્છ, પ્રાણાન્ યચ્છેદ્રિયાણિ ચ .
આત્માનમાત્મના યચ્છ, ન ભૂયઃ(ખ્) કલ્પસેઽધ્વને .. ૪૨..

યચ્છેન્ + દ્રિયાણિ, આત્મા + નમાત્મના

યો વૈ વાઙ્મનસી સમ્ય-ગસં(ય્)યચ્છન્ ધિયા યતિઃ .
તસ્ય વ્રતં(ન્) તપો દાનં(મ્), સ્રવત્યામઘટામ્બુવત્ .. ૪૩..

સ્રવત્યા + મઘટામ્ + બુવત્

તસ્માન્મનોવચઃ(ફ્) પ્રાણાન્, નિયચ્છેન્મત્પરાયણઃ .

મદ્ભક્તિયુક્તયા બુદ્ધ્યા, તતઃ(ફ્) પરિસમાપ્યતે .. ૪૪..

તસ્માન્ + મનોવચઃ(ફ્) + પ્રાણાન્

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(વ્)સ્યાં(મ્)

સં(વ્)હિતાયામેકાદશસ્કન્ધે ષોડશોડધ્યાયઃ .. ૧૬..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે

પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.

ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ.

